# Ribhuproktam Prapanchasya Shunyatvanirupanam

# ઋભુપ્રોક્તં પ્રપઞ્ચસ્ય શૂન્યત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Prapanchasya Shunyatvanirupanam

File name : RRibhuproktaMprapanchasyashUnyatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 8 | 1-27||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં પ્રપઞ્ચસ્ય શૂન્યત્વનિરૂપણમ્

(સર્વં શશવિષાણવત્)
(ઋભુનિદાઘસંવાદે)
વક્ષ્યે પ્રપઞ્ચશૂન્યત્વં શશશૃઙ્ગેણ સમ્મિતમ્ ।
દુર્લભં સર્વલોકેષુ સાવધાનમનાઃ શૃણુ ॥ ૮.૧॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યઃ શૃણોતિ ચ પશ્યતિ ।
દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૮.૨॥

ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ।
અહઙ્કારશ્ચ તેજશ્ચ સર્વં શશવિષાણવત્ ॥ ૮.૩॥

નાશ જન્મ ચ સત્યં ચ લોકં ભુવનમણ્ડલમ્ ।
પુણ્યં પાપં જયો મોહઃ સર્વં શશવિષાણવત્ ॥ ૮.૪॥

કામક્રોધૌ લોભમોહૌ મદમોહૌ રતિર્ધૃતિઃ ।
ગુરુશિષ્યોપદેશાદિ સર્વં શશવિષાણવત્ ॥ ૮.૫॥

અહં ત્વં જગદિત્યાદિ આદિરન્તિમમધ્યમમ્ ।
ભૂતં ભવ્યં વર્તમાનં સર્વં શશવિષાણવત્ ॥ ૮.૬॥

સ્થૂલદેહં સૂક્ષ્મદેહં કારણં કાર્યમપ્યયમ્ ।
દૃશ્યં ચ દર્શનં કિઞ્ચિત્સર્વં શશવિષાણવત્ ॥ ૮.૭॥

ભોક્તા ભોજ્યં ભોગરૂપં લક્ષ્યલક્ષણમદ્વયમ્ ।
શમો વિચારઃ સન્તોષઃ સર્વં શશવિષાણવત્ ॥ ૮.૮॥

યમં ચ નિયમં ચૈવ પ્રાણાયામાદિભાષણમ્ ।
ગમનં ચલનં ચિત્તં સર્વં શશવિષાણવત્ ॥ ૮.૯॥

શ્રોત્રં નેત્રં ગાત્રગોત્રં ગુહ્યં જાડ્યં હરિઃ શિવઃ ।
આદિરન્તો મુમુક્ષા ચ સર્વં શશવિષાણવત્ ॥ ૮.૧૦॥

જ્ઞાનેન્દ્રિયં ચ તન્માત્રં કર્મેન્દ્રિયગણં ચ યત્ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ સર્વં શશવિષાણવત્ ॥ ૮.૧૧॥

ચતુર્વિંશતિતત્ત્વં ચ સાધનાનાં ચતુષ્ટયમ્ ।
સજાતીયં વિજાતીયં સર્વં શશવિષાણવત્ ॥ ૮.૧૨॥

સર્વલોકં સર્વભૂતં સર્વધર્મં સતત્વકમ્ ।
સર્વાવિદ્યા સર્વવિદ્યા સર્વં શશવિષાણવત્ ॥ ૮.૧૩॥

સર્વવર્ણઃ સર્વજાતિઃ સર્વક્ષેત્રં ચ તીર્થકમ્ ।
સર્વવેદં સર્વશાસ્ત્રં સર્વં શશવિષાણવત્ ॥ ૮.૧૪॥

સર્વબન્ધં સર્વમોક્ષં સર્વવિજ્ઞાનમીશ્વરઃ ।
સર્વકાલં (સર્વવાક્યં) સર્વબોધ (સર્વબોધ્યં) સર્વં શશવિષાણવત્ ॥ ૮.૧૫॥

સર્વાસ્તિત્વં સર્વકર્મ સર્વસઙ્ગયુતિર્મહાન્ ।
સર્વદ્વૈતમસદ્ભાવં (સર્વદ્વૈતસ્ય સદ્ભાવં) સર્વં શશવિષાણવત્ ॥ ૮.૧૬॥

સર્વવેદાન્તસિદ્ધાન્તઃ સર્વશાસ્ત્રાર્થનિર્ણયઃ ।
સર્વજીવત્વસદ્ભાવં સર્વં શશવિષાણવત્ ॥ ૮.૧૭॥

યદ્યત્સંવેદ્યતે કિઞ્ચિદ્યદ્યજ્જગતિ દૃશ્યતે ।
યદ્યચ્છૃણોતિ ગુરુણા સર્વં શશવિષાણવત્ ॥ ૮.૧૮॥

યદ્યદ્ધ્યાયતિ ચિત્તે ચ યદ્યત્સઙ્કલ્પ્યતે ક્વચિત્ ।
બુદ્ધ્યા નિશ્ચીયતે યચ્ચ સર્વં શશવિષાણવત્ ॥ ૮.૧૯॥

યદ્યદ્વાચા વ્યાકરોતિ યદ્વાચા ચાર્થભાષણમ્ ।
યદ્યત્સર્વેન્દ્રિયૈર્ભાવ્યં સર્વં શશવિષાણવત્ ॥ ૮.૨૦॥

યદ્યત્સન્ત્યજ્યતે વસ્તુ યચ્છૃણોતિ ચ પશ્યતિ ।
સ્વકીયમન્યદીયં ચ સર્વં શશવિષાણવત્ ॥ ૮.૨૧॥

સત્યત્વેન ચ યદ્ભાતિ વસ્તુત્વેન રસેન ચ ।
યદ્યત્સઙ્કલ્પ્યતે ચિત્તે સર્વં શશવિષાણવત્ ॥ ૮.૨૨॥

યદ્યદાત્મેતિ નિર્ણીતં યદ્યન્નિત્યમિતં વચઃ ।
યદ્યદ્વિચાર્યતે ચિત્તે સર્વં શશવિષાણવત્ ॥ ૮.૨૩॥

શિવઃ સંહરતે નિત્યં વિષ્ણુઃ પાતિ જગત્ત્રયમ્ ।
(શિવો રક્ષતિ માં નિત્યં)

સ્રષ્ટા સૃજતિ લોકાન્વૈ સર્વં શશવિષાણવત્ ॥ ૮.૨૪॥

જીવ ઇત્યપિ યદ્યસ્તિ ભાષયત્યપિ ભાષણમ્ ।
સંસાર ઇતિ યા વાર્તા સર્વં શશવિષાણવત્ ॥ ૮.૨૫॥

યદ્યદસ્તિ પુરાણેષુ યદ્યદ્વેદેષુ નિર્ણયઃ ।
સર્વોપનિષદાં ભાવં સર્વં શશવિષાણવત્ ॥ ૮.૨૬॥

શશશ‍ૃઙ્ગવદેવેદમુક્તં પ્રકરણં તવ ।
યઃ શ‍ૃણોતિ રહસ્યં વૈ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૮.૨૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં પ્રપઞ્ચસ્ય શૂન્યત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૮ । ૧-૨૭॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 8 . 1-27..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Prapanchasya Shunyatvanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*